नाहं शक्यो ऽनुपायेन हन्तुं भूतेन केन चित्
    यो मां प्रयतते हन्तुं ज्ञात्वा प्रहरणे बलम्
    तस्य तस्मिन् प्रहरणे पुनः प्रादुर्भवाम्य् अहम्  (१२)

यो मां प्रयतते हन्तुं यज्ञैर् विविधदक्षिणैः
    जङ्गमेष्व् इव कर्मात्मा पुनः प्रादुर्भवाम्य् अहम् (१३)

यो मां प्रयतते हन्तुं वेदैर् वेदान्तसाधनैः
    स्थावरेष्व् इव शान्तात्मा तस्य प्रादुर्भवाम्य् अहम् (१४)

यो मां प्रयतते हन्तुं धृत्या सत्यपराक्रमः
    भावो भवामि तस्याहं स च मां नावबुध्यते (१५)

यो मां प्रयतते हन्तुं तपसा संशित-व्रतः
    ततस् तपसि तस्याथ पुनः प्रादुर्भवाम्य् अहम् (१६)

यो मां प्रयतते हन्तुं मोक्षम् आस्थाय पण्डितः
    तस्य मोक्ष-रति-स्थस्य नृत्यामि च हसामि च
    अवध्यः सर्वभूतानाम् अहम् एकः सनातनः (१७)

nāhaṃ śakyo 'nupāyena hantuṃ bhūtena kena cit
    yo māṃ prayatate hantuṃ jñātvā praharaṇe balam
    tasya tasmin praharaṇe punaḥ prādurbhavāmy aham  (12)

yo māṃ prayatate hantuṃ yajñair vividhadakṣiṇaiḥ
    jaṅgameṣv iva karmātmā punaḥ prādurbhavāmy aham (13)

yo māṃ prayatate hantuṃ vedair vedāntasādhanaiḥ
    sthāvareṣv iva śāntātmā tasya prādurbhavāmy aham (14)

yo māṃ prayatate hantuṃ dhṛtyā satyaparākramaḥ
    bhāvo bhavāmi tasyāhaṃ sa ca māṃ nāvabudhyate (15)

yo māṃ prayatate hantuṃ tapasā saṃśita-vrataḥ
    tatas tapasi tasyātha punaḥ prādurbhavāmy aham (16)

yo māṃ prayatate hantuṃ mokṣam āsthāya paṇḍitaḥ
    tasya mokṣa-rati-sthasya nṛtyāmi ca hasāmi ca
    avadhyaḥ sarvabhūtānām aham ekaḥ sanātanaḥ (17)